# Yajnavalkyaproktam Pradoshapujadarshanaphalavarnnam

# યાજ્ઞવલ્ક્યપ્રોક્તં પ્રદોષપૂજાદર્શનફલવર્ણનમ્

## Document Information

Text title : Yajnavalkyaproktam Pradoshapujadarshanaphalavarnnam

File name : pradoShapUjAdarshanaphalavarNanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 4 | 14-33 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# યાજ્ઞવલ્ક્યપ્રોક્તં પ્રદોષપૂજાદર્શનફલવર્ણનમ્

સાયઙ્કાલે ત્વયા દૃષ્ટં શિવલિઙ્ગં સમર્ચિતમ્ ।
તેન પુણ્યપ્રભાવેન જ્ઞાનમેવમભૂત્ તવ ॥ ૧૪॥

તદિદં પુણ્યમુત્કૃષ્ટં તત્પ્રભાવાત્તવેદૃશી ।
મતિર્યુક્તા ન સન્દેહઃ તત્પુણ્યં તાદૃશં યતઃ ॥ ૧૫॥

શઙ્કરાનુગ્રહેણૈવ તત્પુણ્યમભવત્ તવ ।
અન્યથા તાદૃશં પુણ્યં દેવાનામપિ દુર્લભમ્ ॥ ૧૬॥

શિવલિઙ્ગાર્ચનં દૃષ્ટ્વા સાયઙ્કાલે વિશેષતઃ ।
સ્વયં નૃત્યતિ સન્તુષ્ટો દિવ્યદેવગણૈઃ સહ ॥ ૧૭॥

પ્રદોષસમયે દૃષ્ટં શિવલિઙ્ગં સમર્ચિતમ્ ।
સર્વકામદમિત્યાહુઃ તત્સત્યમભવત્ ખલુ ॥ ૧૮॥

સન્દિહાનઃ શિવાચારે પાપિષ્ઠો ન પ્રવર્તતે ।
એતાદૃશં મહાભાગ્યમધુના દૃષ્ટમદ્ભુતમ્ ॥ ૧૯॥

તવ સ્વરૂપં વિજ્ઞાતં ત્વયાપિ ન શિવાર્ચનમ્ ।
કૃતં પાપેન નીતાનિ દિનાનિ ખલુ સર્વદા ॥ ૨૦॥

દુષ્પ્રતિગ્રહલોલસ્ત્વં દુરાચારરતઃ સદા ।
ન સ્નાનકર્મનિરતો વૈદિકં જ્ઞાયતેઽપિ વા ॥ ૨૧॥

નીચાન્નભક્ષણેનૈવ વયો નીતં ત્વયા ખલુ ।
મદ્યપાઙ્ગનયા સાકં બહુકાલમવસ્થિતમ્ ॥ ૨૨॥

તસ્માદુત્પાદિતાઃ પુત્રાઃ કન્યકાશ્ચ દુરાત્મના ।
ત્રિપુણ્ડ્રધારણં તાવન્ન કૃતં શ્રુતિચોદિતમ્ ॥ ૨૩॥

રુદ્રાક્ષાણાં ચ ધરણં કદાચિન્ન કૃતં ત્વયા ।
બિલ્વપત્રં ન નિક્ષિપ્તં જલં વા લિઙ્ગમસ્તકે ॥ ૨૪॥

ન દીપવર્તિકા દત્તા ત્વયા શઙ્કરમન્દિરે ।
દીપપ્રદાનવાર્તા તુ દૂરતસ્તવ સર્વથા ॥ ૨૫॥

ન સોમવાસરે ભુક્તં નિયમાન્નિશિ સાદરમ્ ।
શામ્ભવૈઃ સહ સંલાપો ન ત્વયા કૃત એવ હિ ॥ ૨૬॥

પુણ્યાઃ શિવકથાલાપાઃ સર્વથા ન શ્રુતાસ્ત્વયા ।
રુદ્રાધ્યાયો ન જપ્તો હિ મન્ત્રરત્નસમાશ્રયઃ ॥ ૨૭॥

એતાદૃશેન દુષ્ટેન પ્રદોષે દૈવયોગતઃ ।
શિવલિઙ્ગં ત્વયા દૃષ્ટં કૃતકૃત્યોઽસિ તાવતા ॥ ૨૮॥

શિવલિઙ્ગં ન દૃષ્ટં ચેત્ સાયઙ્કાલે ત્વયા તદા ।
આકલ્પં નરકાત્ ઘોરાત્ પ્રચ્યવસ્તે કથં ભવેત્ ॥ ૨૯॥

શિવાચારવિહીનાનાં નરકાત્ નિર્ગમાકથમ્ ।
પુત્રાદિભિઃ સહાવાસો નરકેષ્વેવ કોટિશઃ ॥ ૩૦॥

જન્મોત્તરં વા સતતં શિવમર્ચય સાદરમ્ ।
જાતિસ્મરત્વં સમ્પ્રાપ્ય તેન પુણ્યેન સત્વરમ્ ॥ ૩૧॥

તત્વજ્ઞાનસ્ય ધર્માણાં યાગાનામપિ યત્ફલમ્ ।
તત્ફલં કેવલં મન્યે શ્રીમહાદેવપૂજનમ્ ॥ ૩૨॥

શિવાર્ચનેન સર્વેષાં કામાનાં સિદ્ધિરિત્યતઃ ।
પ્રયત્નૈર્બહુભિર્નિત્યં કુરુ શઙ્કરપૂજનમ્ ॥ ૩૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યાજ્ઞવલ્ક્યપ્રોક્તં પ્રદોષપૂજાદર્શનફલવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૪ - પ્રદોષપૂજાદર્શનફલવર્ણનમ્ । ૧૪-૩૩॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 4 - pradoShapUjAdarshanaphalavarNanam . 14-33..

Proofread by Ruma Dewan

*Yajnavalkyaproktam Pradoshapujadarshanaphalavarnnam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*